# धेनोर्व्याघ्रः पलायते ।

पुरा भोजराजेन समस्या उद्घोषिता आसीत्, 'मृगात् सिंहः पलायते' इति । सृष्टिनियमविरुद्धं किञ्चित् प्रतिपादितं तत्र । तथापि नैकैः कविभिः सा समस्या विभिन्नप्रकारैः पूरिता । ईदृशी एव काचित् समस्या समुत्पन्ना 'चिमणरावस्य' जीवने । चिमणरावः नाम चि. वि. जोशी इति लेखकवर्येण निर्मितम् अजरामरपात्रम्। 'चिमणरावाचे चऱ्हाट' इति कथासङ्ग्रहात् 'कॅप्टन चिमणराव-स्काउटमास्तर' इति कथायाः अयम् अनुवादः। 'स्काउट्' नाम 'बालवीरचमूः' । बाल्यादारभ्य एव परोपकारस्य, शौर्यस्य, परस्परसहकार्यस्य, समाजसेवायाः च संस्कारान् मनसि रोपयितुम् आरब्धा काचित् यन्त्रणा एषा । एतादृशं बालसैन्यं निर्मातव्यम् इति चिमणरावस्य महती आकाङ्क्षा आसीत् । तादृशं गणं निर्माय विरामकाले बनेश्वरग्रामं शिबिरार्थं सर्वे सम्प्राप्ताः। शिबिरसमये परोपकारस्य कथम् अवसरः लब्धः कः च अनवस्थाप्रसङ्गः उद्भूतः इति स्वयं निवेदयति चिमणरावः। कथायाम् अस्यां प्रासङ्गिकः, शाब्दिकः तथा चिमणरावस्य स्वभाववैशिष्ट्येन निर्मितः सरलः विनोदः वाचकस्य मुखे नूनं स्मितरेखां जनयति । कथा एषा **'समर्पणम्'** वार्षिकाङ्कात् स्वीकृता ।

शिबिरस्य प्रथमदिने एव भोजनादिकं समाप्य मध्याह्ने बालैः सह पत्रक्रीडायां मग्नः आसम् अहम् । तदा सद्यः एव परिचितः प्रोफेसर-सर्कसवाले (सर्कस-क्रीडारङ्गस्य स्वामी) मामेव अन्विष्यन् तत्र समागतः । "कॅप्टनसाहेब, शृणोतु कॅप्टनसाहेब ! अस्माकं सर्कसक्रीडायां कतिपयेभ्यः मासेभ्यः लोकप्रियः सहभोजनकार्यक्रमः प्रचलति । गौः, भल्लूकः व्याघ्रश्च इत्येतेषां पशूनाम् अयं कार्यक्रमः प्रयोगस्य सर्वोच्चम् आकर्षणम् अस्ति । तथा विज्ञापनं कृत्वा प्रवेशपत्राणि अपि विक्रीतानि । परन्तु व्याघभल्लूकयोः कलहकारणात् द्वावपि व्रणितौ ।" "किं प्राणिनोः कलहः?" "महाशय, अस्माकं सर्कसक्रीडायां तु व्याघ्रभल्लूकौ द्विपादौ एव ।" एवं प्राध्यापकमहाशयेन रहस्यभेदः कृतः। "नास्ति अस्माकं सामर्थ्यं व्याघ्रं वा भल्लूकं वा पालयितुम् । क्रीडायां द्वौ बहुरूपधारिणौ नरौ एव व्याघ्रं भल्लूकं च नाटयतः ।" "किं धेनुरपि...?" "नहि नहि, धेनुस्तु वास्तविकी एव ।" "हंऽऽ .. कथयतु तर्हि किं मया करणीयम् अत्र?" "अहं प्रार्थये यत् भवतः बालवीरचमूतः कौ अपि द्वौ सैनिकौ अद्यतनक्रीडायां यदि व्याघ्रभल्लूकवेषौ धृत्वा प्रेक्षकाणां मनोरञ्जनं कुर्यातां तर्हि महान् उपकारः स्यात्। कृपया साहाय्यं करोतु ।"



सर्कसस्वामिनः विवशता मया अवगता । यदृच्छया प्राप्तः अयं परोपकारस्य अवसरः इति मत्वा तस्य साहाय्यं करणीयमिति मया निश्चितम् । भल्लूकवेषे अब्दुलः शोभेत इति मत्वा सः भल्लूकपात्रे नियोजितः । व्याघ्रस्य अभिनयार्थम् अहं स्वयमेव सिद्धः। एवं पात्रयोजना निर्धारिता ।

कार्यक्रमात् प्रागेव अहं तथा अब्दुलः व्याघ्रभल्लूकवेषौ धृत्वा स्वपञ्जरयोः समुपस्थितौ। मम पञ्जरस्य पुरतः एव अधिकः सम्मर्दः जातः । यावच्छक्यम् अहं जनान् रञ्जयितुं प्रयत्तवान् किन्तु जनाः न सन्तुष्टाः । ''किमयं व्याघ्रः? कृशोऽयम्'' इति उपहासेन अवदन् । तदा एव एका महिला स्वपुत्रेण सह व्याघ्रं द्रष्टुम् आगता। मम गर्जनां श्रुत्वा बालः भीतः अतः सा माता मयि पाषाणखण्डान् अक्षिपत् । तदा वेदनया बाधितः अहं क्षणं यावत् व्याघ्रः न वदति इति विस्मृत्य अवदम्,

''दृष्ट्वा पञ्जरस्थितान् व्याघ्रान्, महिलाः क्षिपन्ति पाषाणखण्डान् ।''

मम वाक्यसमाप्तेः पूर्वमेव व्याघ्रस्य मनुष्यवाण्या भाषणेन मूर्च्छिता सा महिला 'भूतोऽयं भूत'...इति उच्चैः आक्रोशन्ती भूमौ पतिता । मम पुत्रः राघुः अपि एकवारं पञ्जरसमीपम् आगत्य, ''आप्पा ! चायं पातुम् इच्छति किम्?'' इति यदा पृष्टवान् तदा प्रेक्षकाः सम्भ्रान्ताः एव ।

रात्रौ दशवादने सर्कसक्रीडायाः प्रारम्भः जातः । द्वादशवादने क्रीडायाः चरमबिन्दुः समायातः–सहभोजनम्। प्रेक्षकाणाम् उत्कण्ठायाः पराकाष्ठा जाता । सेवकः मञ्चे त्रीणि आसनानि स्थापितवान् मध्यभागे च वर्तुलाकारं पीठम् । अहम् एकस्मिन् आसने उपावेशितः । अत्रान्तरे भल्लूकवेषधारी अब्दुलः तत्र प्राप्तः। गौः अपि मञ्चं समागता। ततः अस्माकं पुरतः खाद्यस्य योजना कृता । सहभोजनस्य प्रारम्भे जाते उत्तेजितैः प्रेक्षकैः आनन्देन तालिकावादनम् आरब्धम् । पूर्वमपि व्याघ्रभल्लूकौ मानुषौ एव । तथापि सा धेनुः ताभ्यां सह कार्यक्रमं कर्तुम् अभ्यस्ता आसीत् । अचिरादेव न इमौ परिचितौ व्याघ्रभल्लूकौ इति धेन्वा लक्षितम्। सम्भ्रमेण संशयेन च एकैकशः आवां दृष्टवती। यदा च तस्याः प्रत्ययः जातः तदा शृङ्गे उन्नम्य नौ आक्रामत् । अहमपि गर्जनां कृत्वा तीक्ष्णदन्तान् दर्शितवान्। किन्तु न किञ्चिदपि भयं तस्याः। अब्दुलः तां हस्तेन ताडितवान्। तेन क्षुब्धा सा तम् अन्वधावत् । भल्लूकः तदा चापल्येन पटमण्डपस्तम्भम् आरूढवान् । इयं सर्वा क्रीडा पूर्वनियोजिता इति विचिन्त्य प्रेक्षकाः अपि प्रमुदिताः । भल्लूकः निर्गतः इति क्रुद्धा सा धेनुः अधुना व्याघ्रं मां लक्ष्यं कृतवती ।

भीत्या अहं चतुष्पादविशिष्टं व्याघ्रत्वं विस्मृत्य द्विपादं मूलस्वरूपमाश्रितवान् । ''प्राध्यापकमहाशय, परित्रायतां, परित्रायताम्'' इति करुणं विलपन् अधावम् । तदा धेनोः भीतं, पलायमानं व्याघ्रं दृष्ट्वा प्रेक्षकाः कोलाहलं कृतवन्तः। अनन्तरं मम व्याघ्रवेषं निष्कास्य मां निर्घृणं ताडितवन्तः । वेदनाभिः अहं मूर्च्छितः। यदा च जागरितः तदा अस्माकं शकटः पुनः पुण्यपत्तनदिशं प्रस्थितः आसीत् । मम उत्तमाङ्गम् अन्यानि च अनुत्तमानि अङ्गानि उपचारपट्टिकाभिः विभूषितानि आसन् ।

## भाषाभ्यासः



**१. पूर्णवाक्येन उत्तरं लिखत।**

अ) चिमणरावः कस्यां मग्नः?
आ) क्रीडायां कौ व्याघ्रं भल्लूकं च नाटयतः?
इ) महिला केन मूर्च्छिता?
ई) चिमणरावेण किं निश्चितम्?
उ) सर्कसक्रीडायाः प्रारम्भः कदा जातः?
ऊ) चिमणरावः किमर्थं प्रयत्तवान्?
ए) कैः आनन्देन तालिकावादनम् आरब्धम्?
ऐ) धेन्वा किं लक्षितम्?
ओ) भल्लूकः कुत्र आरूढवान्?
औ) प्रेक्षकाः कदा कोलाहलं कृतवन्तः?

**२. माध्यमभाषया उत्तरं लिखत ।**

अ) सर्कसस्वामी किमर्थं चिमणरावं प्रति आगतः ?

आ) सर्कसक्रीडायाः आरम्भात् पूर्वं किं किम् अभवत्?

इ) पशूनां सहभोजनसमये कः हास्यपूर्णः अनवस्थाप्रसङ्गः समुत्पन्नः?

**३. समानार्थकशब्दान् लिखत ।**

मग्नः, गौः, व्याघ्रः, सैनिकः, क्रीडा, वेदना, भाषणम्, उत्कण्ठा, मनुष्यः, शृङ्गे, दन्ताः, उत्तमाङ्गम्

**४. विरुद्धार्थकशब्दान् लिखत ।**

समाप्य, प्राक्, विस्मृत्य, कृशः

**५. प्रश्ननिर्माणं कुरुत ।**

अ) अहं बालैः सह पत्रक्रीडायां मग्नः आसम् ।

आ) धेनुः वास्तविकी एव ।

इ) सर्कसस्वामिनः विवशता मया अवगता ।

ई) भल्लूकवेशे अब्दुलः शोभेत ।

उ) महिला मयि पाषाणखण्डान् अक्षिपत् ।

ऊ) गौः मञ्चं समागता ।

**६. कः कं वदति ?**

अ) 'विज्ञापनं कृत्वा प्रवेशपत्राणि अपि विक्रीतानि ।'

आ) 'किं धेनुरपि ...?'

इ) 'चायं पातुम् इच्छति किम्?'

**७. विशेषण-विशेष्याणां मेलनं कुरुत ।**

| विशेषणम् | विशेष्यम् |
|---|---|
| लोकप्रियः | आकर्षणम् |
| सर्वोच्चम् | शुल्कम् |
| बहुरूपधारिणौ | व्याघ्रान् |
| अधिकम् | प्रेक्षकाः |
| अधिकः | प्रेक्षकेषु |
| भीतः | सहभोजनकार्यक्रमः |
| पञ्जरस्थितान् | नरौ |
| सम्भ्रान्ताः | सम्मर्दः |
| त्रीणि | व्याघ्रभल्लूकौ |
| निमग्नेषु | बालः |
| परिचितौ | आसनानि |

**८. अमरकोषात् शब्दं प्रयुज्य वाक्यं पुनर्लिखत ।**

अ) धेनुः तु वास्तविकी एव ।

आ) मम उत्तमाङ्गम् उपचारपट्टिकाभिः विभूषितम् ।

**९. सूचनानुसारं कृतीः कुरुत ।**

अ) पत्रक्रीडायां मग्नः आसम् अहम् ।
(बहुवचने लिखत।)

आ) जनाः न सन्तुष्टाः । (एकवचने लिखत)

इ) प्रेक्षकाः मां निर्घृणं ताडितवन्तः ।
(वाच्यपरिवर्तनं कुरुत ।)